National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2025; 1(63): 190-193
© 2025 NJHSR
www.sanskritarticle.com

**Dr. G. Suresh**
Assistant Professor in
Sanskrit Sahitya
The Madras Sanskrit College

**Correspondence:**
**Dr. G. Suresh**
Assistant Professor in
Sanskrit Sahitya
The Madras Sanskrit College

# शैवागमप्रोक्त-सपर्याभेद-परामर्शः

**Dr. G. Suresh**

निखिलप्रपञ्चसृष्टिकारणभूत – अष्टाविंशत्यागमस्वरूप - विविधविद्यापुञ्जाविर्भावक – सृष्टिस्थिति-संहारतिरोभवानुग्रहपञ्चकृत्याकार – सकलपशपाशचयान्धकारभास्कर – भक्तवाञ्छित -फलदातृधुरन्धररूपशिवप्रियया विनततद्विनुतोन्नतपुरीभूत - कैलासगिरीशस्य - " **मायान्तु प्रकृतिं विद्यात् मायिनन्तु महेश्वरम्**[1]" **- उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम्**[2] - इत्यादि विश्वाधिकत्वविश्वसेव्यत्वव्यवस्थापनपरस्य महेश्वरस्य" **स नो बुद्ध्या शुभया संयुनक्तु ईश्वरात् ज्ञानमिच्छेत्** "[3] - इति बहुधा बहुस्मृत्युपश्लोकितजगदीशस्य पशुरिरिक्षकस्य वैकुण्ठनाथादिवृन्दारकौघेन तोष्ट्रयमानस्य भगवच्चराचरगुरोः त्र्यंबकस्य चतुराननस्य निराधारसाधारदीक्षागुरोः सर्वदा सर्वदशिवदायकानुग्रहलेशमात्रेण शैवागमा आविरभाविषत। तदुक्तञ्च -

**आगतं शिववक्त्रेभ्यः गतञ्च गिरिजानने।**
**मतं श्रीवासुदेवस्य तस्मादागम उच्यते॥**
**आगमोक्तविधानेन कलौ देवान् यजेत् सुधीः।**
**न हि देवाः प्रसीदन्ति कलौ चान्यविधानतः॥**
**पञ्चवर्णैर्भवेद्दीक्षा ह्यागमोक्तैः श्रुणु प्रिये ।**
**यां कृत्वा कलिकाले च सर्वाभीष्टं लभेन्नरः॥**[4]

इति तन्त्ररूपागमस्य प्रामाण्यं तदुपासनादिषु कलौ अधिकारिविशेषणङ्कर्तव्यता तन्त्रसारे यामले विद्यते। अतः चतुराननस्य परमेश्वरस्य पञ्चमुखानि सन्ति - इति सुप्रसिद्धोऽयं विषयः। तानि ईशानमुखम्-तत्पुरुषमुखम्-अघोरमुखम्-वामदेवमुखम्-सद्योजातमुखम्।

अस्मात् कारणात् जनमनस्सु दैविकचिन्तना आराधनाबुद्धिश्च वर्धमानावर्तत वर्तते च। तेन ते दैवविषयं तेषामाराधनक्रमं पूजाविषयादिकं च अजिज्ञासन्। दैवपूजाचरणादिकं कथं केन कर्तव्यं - कुत्र कर्तव्यं यद्योग्यतां स्वीकृत्य कर्तव्यं - पूजां विधातुं किमध्ययनीयं - पूजाकरणविषये यः कोऽपि संस्कारक्रमः अस्ति वा - तथा अस्ति चेत् संस्कारक्रमः कथं विधातव्यः - तत्र आचार्यलक्षणं किम् शिष्यलक्षणं किम्? - इत्यादिसमस्तजटिलप्रश्नानामुत्तरम् एक एव सारतया भवति - आगमः इति। किञ्च यद्यपि वेदादिषु देवतानमस्कृतयः प्रोक्तास्सन्ति तथापि तेषु पूजाराधनक्रमः अर्थात् परार्थपूजाराधनक्रमः न दृश्यते। तदर्थमेव जनमनाह्लादयितुं इहापरजन्मनि अनितरसाधारणसुखं लब्धुं चागमा एव नः मार्गदर्शकाः भवन्ति। आगमशब्दस्य अर्थः इत्थं निगद्यते विद्वत्तल्लजैः नीलकण्ठकण्ठतः उपदेशरूपेण बहिरागतः आगमः - इति ॥

आ-ग- म इत्यत्र आ-इत्युक्ते आगमनं ग-इत्यस्य गमनं म-इत्यस्य मतं इत्यर्थः लभ्यते। तस्मात् वेदः सामान्यमार्गः - आगमः विशेषमार्गः इत्यपि गीयते। एवञ्च आगमस्य तन्त्रः इत्यपि नामान्तरं। येन तन्त्रः अनुष्ठीयते तदनुष्ठातारं सर्वत्र रक्षति ।

शैवागमे त्रिपदार्थ-चतुष्पादज्ञानमत्यौत्कृष्ट्यरूपेण विशेषेण वर्ण्यते। पति-पशु-पाशाः - एतत्त्रितयं त्रिपदार्थः इति कथ्यते। चर्या-क्रिया-योग-ज्ञानं चतुष्टयं चतुष्पादाः इतीर्यन्ते। त्रिपदार्थे पतिः परमेश्वरः, पशुः जीवः, पाशः आणवकर्ममायादिमलत्रयं विद्यते। शैवागमोक्तरीत्या दीक्षाकरणेन परमेश्वरस्य सपर्यां कृत्वा पशुरूपजीवस्य मलानुन्मुच्य पतित्वप्राप्तिः सम्भवतीति समेषामपि शिवाङ्गजशिव-द्विजपरंपरागुरूणामुक्तिरस्ति। अत्र पशुरूपः कः इति विचार्यमाणे,

**सूक्ष्मा कलादयः पूर्वं स्थूला बध्नन्त्यणूंस्ततः ।**

**मायामण्डलमध्यस्थाः पुमांसः सकला मताः ॥**[5]

इत्युच्यते पौष्करागमे। पशुः नाम, आत्मानमधिकृत्य तत् ज्ञात्वा या शक्तिः बहिराविष्करोति, तच्छक्तेः निमित्तभूततया विद्यमान-कला-इत्यादि तत्वादिकं यया शक्त्योत्पद्यते, सा एव शक्तिः अतिसूक्ष्मसृष्टिरूपेण विद्यते इति प्रोच्यते। अनणुक्षेत्रज्ञादिपदवेदनीयः जीवात्मा पशुः न तु चार्वाकादिमतवद्देहादिरूपः। अपि चोक्तम् -

**दृक्शक्तिव्यञ्जिका सूक्ष्मा स्थिता तत्त्वात्मनात्मनि ।**

**स्थूला भुवनरूपेण शरीराद्यात्मना स्थिता ॥**[6]

इति। जीवाः मलबन्धकारणेनैव विज्ञानाकलः-प्रलयाकल-सकल-इति त्रिविधरूपेण विद्यन्ते इति पौष्करागमे कारणागमे च निगदितं भवति। विज्ञानकारणेन कलासम्बन्धरहितः विज्ञानाकलः इति भवति। विज्ञानं नाम अतिसूक्षरूपेण विद्यमाना उन्नताधीरितीर्यते। तद्विज्ञानम् अकलः, कलारहितः, अर्थात् आणवकर्ममायादित्रिमलेषु कर्ममायामलरहितः, आणवमलमात्रयुक्तः यः भवति, सः विज्ञानाकलः- अर्थात् विज्ञानकेवलः। अतः अत्र अतिसूक्षतया विद्यमानं यत् ज्ञानं विद्यते, तदकलः भवति। २१४ भुवनेषु शुद्धविद्यायाः अशुद्धमायायाः मध्ये विद्यमानाः - दीक्षासमये एते पक्वापक्वभैदाभयां द्वेधा भवन्ति विज्ञानाकलाः। तत्र पक्वविषयेऽपि तीव्रशक्तिनिपातयुक्तः शिवामुग्रहं प्राप्य ज्ञानपादे आचार्यत्वेन विद्यमानहेतोः परमुक्तियुक्तः भवति। तीव्रशक्तिनिपातयुक्तेष्वपि सृष्ट्यादिसमये ईशानुग्रहमवाप्य अधिकारमलयुक्तः सर्वज्ञतत्वयुक्तः इति षड्गुणोपेतरूपेण एते शुद्धाद्भुवनपतित्वेन अनुसदाशिव अनन्तरादि मन्त्रेश्वर इत्यादि अपरमुक्तेभ्यः प्रलयकाले एव परमुक्तिं प्राप्नुवन्ति तीव्रशक्तिनिपातयुक्ताः। परन्तु ये अपक्वाः तीव्रशक्ति-निपातरहिताः, ते शुद्धविद्या-अशुद्धमायाभ्यन्तरे तत्र विद्यमानभुवनेषु केवलरूपे विद्यते, केवलपदस्य आणवमलमात्रयुक्तः इत्यर्थोऽवगम्यते। अतः विज्ञानाकलः विज्ञानकेवलः इत्यप्यभिधीयते।

विज्ञानाकलः- प्रलयाकल-सकलकलादीनामेतेषां त्रयाणां शक्ति-निपातमार्गेणैव शिवत्वं प्राप्यते इति सकलविदितमेव। प्रलयसमये कलादितत्वरहितः सृष्टिकाले कलादितत्वसहितः यः सः आणवकर्ममलमात्रयुक्तः द्विमली प्रलयाकलः इति कथ्यते। एतेषां शक्तिनितौपातः तीव्र-तीव्रतररूपाभ्यां द्वेधा भवति। अशुद्धमायातः अरागतत्वपर्यन्तं यानि च विद्यन्ते, तत्र एते प्रलयाकलाः विराजन्ते।

एते अपि पक्वापक्वरूपाभ्यां द्वेधा भवन्ति। पक्वप्रलयाकलेषु तीव्रतरशक्तिनिपातयुक्ताः शिवानुग्रहं प्राप्य शुद्धाशुद्धाध्वनोः भुवनपतित्वेन स्थित्वा प्रलयकालेषु परमुक्तिं प्राप्स्यन्ति। अपक्वास्तु सृष्टिकाले एव सकलरूपेण विद्यन्ते। कलयतीति कलोऽस्ति। तत्वैः साकं यः विद्यते सः सकलः। एते आणवकर्ममायादि-त्रिमलयुक्ताः भवन्ति। देवाः, मानवाः, सामान्यजीवराशिनः इत्यादयः सकलाः सन्ति। तीव्रतर-तीव्र-मन्द-मन्दतर-इत्यादिभिः चतुर्विधरूपेण शक्तिनिपातः एतेषां सिध्यति। एतादृशशक्तिनिपातद्वारा परमेश्वरं प्राप्नुवन्ति। मूलभुवनतः पृथ्वीतत्वपर्यन्तं एतेषां भुवनानि विद्यन्ते। अयमपि सकलः पक्वापक्वरूपाभ्यां द्वेधा भवति। अनुग्रहरूपेण पक्वयुक्तः मलपरिपाक मलपरिपाक-शक्तिनिपाताभ्याम् ईश्वरानुग्रहं प्राप्नुवन्ति। अपक्वास्तु आचार्योक्तपूजाविधानेन सर्वं लभन्ते।

विज्ञानाकलानां निराधाररूपेण मलादिकं दूरीकरोति भगवान्। विज्ञानाकलः-प्रलयाकल-उभयविध-पशुरूपजीवयोःसाक्षात् परमेश्वरः एव स्वयमेव अन्तरात्मनि स्थित्वा अथवा प्रत्यक्षरूपेण वा अनुगृह्णाति दीक्षया। तत्र अन्तरात्मनि यादृशानुग्रहः भवति, तत् विज्ञानाकलानाङ्कृते भवति। प्रलयाकलानाङ्कृते हरिण-टङ्क-चतुर्भुजाभ्यामाविर्भूय अनुगृह्णाति। सकलानाङ्कृते दीक्षागुरु-मधिष्ठाप्य दीक्षा द्वारा तत्वादिकं बोधयत्वानुगृह्णाति।

एवं रीत्या दीक्षाख्यकर्मणा तत्तत्पक्वानुसारं सकल-प्रलयाकल-विज्ञानाकलत्वेन जीवाः विद्यन्ते, एते सर्वेऽपि स्वगुरूपदिष्टप्रकारं स्वकीयात्मार्थपूजानुसारं तत्त्पदादिकं लभन्ते।

मानसिकतया सश्रद्धं क्रियमाणदेवताविषयकस्मरणमेव पूजा इत्युच्यते खलु। प्रायः समेष्वपि आगमग्रन्थेषु पूजा - इति पदम् एवं चिन्त्यते -

**पूर्यते सर्वकर्माणि जायते ज्ञानमात्मनि ।**

**पूरणात् ज्ञानदातृत्वाच्च पूजाशब्दः प्रकीर्तितः ॥**[7]

दीक्षिता जनाः अनुदिनं शिवपूजां अकृत्वा यत्किमपि कार्यादिकं न कुर्युः। अपि च विना शिवार्चनायाः धर्मैः शिवज्ञानमपि न प्राप्यते । अतः एतन्मुख्यार्थं मनसि निधाय पूजाशब्दविवरणे पू - इत्युक्ते पूरणं अर्थात् विहितसकलकर्मपूरणं तत्रापि पूजनेन सर्वं अस्मत्कर्म पूर्यते इति कारणात्। जा - इत्युक्ते जायते अर्थात् सकलविहितकर्मपूरणेन शिवज्ञानं जायते इति विद्यमानत्वात् - तद्देवताविषयकरतिः पूजा इत्युच्यते। इत्थं पूजाप्रियाय परमेश्वराय क्रियमाणा पूजा द्विविधा भवति प्रोक्ता । सा आत्मार्थ-परार्थाभ्यां द्वेधा। तत्र आत्मार्थपूजा समयादिदीक्षाप्राप्तवद्भिः शिवद्विजादिजनैः प्रतिदिनं शिवानुष्ठा-नोक्तप्रकारं क्रियते। अत्रापि आत्मार्थपूजायां समे दीक्षितजनाः योग्या भवन्ति । शैवसम्ये जनिताः समेऽपि दीक्षां प्राप्य आत्मार्थपूजाम् अनवरतं कुर्वीरन् - इति शैवागमनियमः। अमुं विषयं शिवार्चनादीपिकायाम् -

**अवश्यं कार्यं शैवानां आत्मार्थशिवपूजनम् ।**

**शिवाग्निगुरुपूजा च कर्तव्या जीविताविधि इति ॥**[8]

अतः आत्मार्थपूजनमपि नित्यकर्मानुष्ठानेऽन्तर्भवति। सुप्रभेदागमः अपि शिवपूजा एव लोके श्रेष्ठतमा भवति - इति कथयति- "**शिवपूजासमं पुण्यम् न भूतं न भविष्यति**"।[9] एवमेव शिवधर्मोत्तरविषयं शैवभूषणग्रन्थे -

**नास्ति लिङ्गार्चनादन्यत् पुण्यमप्यधिकं क्वचित्।**

**इति विज्ञाय यत्नेन पूजनीयस्सदा शिवः ॥**[10]

कामिकागमेऽपि –

**अग्निहोत्रञ्च वेदाश्च यज्ञाश्च बहुदक्षिणाः ।**

**शिवलिङ्गार्चस्येते कोटचं केनापि नो समाः ॥**[11]

इत्युक्तम्। तस्मात् अस्माकं जनिकारणभूतः परमेश्वरः कार्तज्ञरूपेण आधमर्येन च अस्माभिः नित्यं एकेनापि बिल्वदलेन पूज्येत मनसा 'एकबिल्वं शिवार्पणम्' तर्हि सर्वं लभ्यत। अंशुमदागमे 'चतुर्वर्णोद्भवस्त्रीणां अर्चनं तु विशेषतः' – इत्युक्तप्रकारं चातुर्वर्ण्योद्भवस्त्रीणामपि पक्षपातं विना कथिता भवति - इति ज्ञेयम्। शिवगीता - इति ग्रन्थे सभक्तिपूर्वकं शिवपूजाचिकीर्षवः सर्वेऽपि आत्मार्थपूजाकरणार्हाः भवन्ति - इत्युच्यते। एवम् आकस्मिकात् शरीरं यदा स्वस्थेतरद्भवति तदा साररूपेण यथाशक्ति पूजां कुर्युः - अनेन कापि न क्षतिः। आत्मथपूजार्थं पूज्यमानशिवलिङ्गः द्वादशधा भवति - इति कामिकागमे भवति -

**सिक्तं तण्डुलंश्च अन्नं नदीमृद्गोमयम् तथा ।**

**नवनीतश्च रुद्राक्षं भस्म चन्दनकूर्चकम् ॥**

**पुष्पमालाकुलञ्चैव क्षणिकं द्वादशं भवेत् ॥**[12]

इत्युक्तप्रकारं लिङ्गं स्वीकर्तव्यम् । दीक्षान्ते गुरुणा दत्तलिङ्गे वा स्वयमात्मनि वा क्षणिकमण्डले तोये आत्मार्ह्यजनं स्मृतम् - इत्यपि कारणागमे उक्तं भवति सैकतलिङ्गपूजनम् एवं तण्डुले - शुद्धान्ने नदीतीरवालुके - गोमये - हैय्यङ्गवीने - रुद्राक्षे – भस्मनि – चन्दने - पुष्पे - गुडे इत्येतेषु एकस्मिन् शिवपूजनमेव क्षणिकलिङ्गपूजा इति आत्मार्थपूजायां विधितः भवति ।

**विप्रक्षत्रियविट्शूद्राः दीक्षिताश्च प्रवेशकाः ।**

**आत्मर्थयजनं कुर्युः न कुर्युस्तु परार्थकम् ॥**[13]

इति परार्थपूजाविषयः मकुटागमे भवति। दीक्षितास्समेऽपि आत्माथपूजार्हाः परन्तु परार्थपूजार्हाः न भवन्ति शिवद्विजं विना। यतः शिवाचार्यकुलोत्पन्नाः अर्थात् सप्तविधशैवेषु आदिशैवकुलोत्पन्नाः एव परार्थपूजार्थं विहिता भवन्ति। तत्र शैवालयेषु शैवागमोक्तप्रकारं सपर्याः क्रियन्ते चेत् ताभिः सपर्याभिः लोकक्षेमः सस्यादिक्षेमः - तद्द्वारा सर्वजनक्षेमादिकं संभवति। अतः आगमविहितक्रममनुल्लङ्घ्य आदिशैवा एव शिवपरार्थपूजार्हाः - इति निश्चप्रचं प्रतिभाति। किञ्च परार्थम् अर्थात् परेषां कृते जनानां सौकर्याय श्रद्धापूर्वकं तत्रापि प्रप्रथमं स्वकीयात्मार्थपूजादिकं परिसमाप्य करणीया परार्थपूजा। क्षुद्रदेवतानां क्रियमाणा परार्थपूजा भक्तिपूर्विका अर्थात् तत्र मन्त्रक्रियाक्रमो नास्ति। एवञ्च उपासनापूर्वकेन क्रियमाणा परार्थपूजा आगमतन्त्रानुसारिणी भवति। परार्थपूजायामेव नित्योत्सव-पक्षोत्सव-मासोत्वादिसहिताः ब्रह्मोत्सवः, उडुपोत्सवः, प्रायश्चित्तपूजा, पवित्रोत्सवः इत्यादयः क्रियन्ते तत्तद्देवालयानामागामानुसारम्। इत्थं परार्थपूजा शैवनुष्ठाने प्रधानस्थानं वहति ।

अतः शैवागमप्रोक्तसपर्याकरणेन समेषां पशुरूपजीवानां भुक्तिद्वारा मुक्तिः निश्चप्रचमवाप्यते। तस्मादनुदिनम् आत्मार्थपूजां परार्थपूजाञ्च यथोक्तं यथागमम् अवश्यं कुर्युः।

इति शम्

**<u>पाद टिप्पणी:</u>**

[1] श्वेताश्वतरोपनिषत् ४.१०

[2] कैवल्योपनिषत् ७

[3] ऋग्वेदः १.१८१.९

[4] योगतन्त्रविभागः रुद्रयामलम्

[5] पौष्करागमः पु १४८ श्लोकः ६२

[6] तत्रैव, पु १४८ श्लोकः ६१

[7] अघोरशिवः क्रियाक्रमद्योतिका २००७ पु ३८

[8] सद्योजातशिवाचार्यः शिवाचर्नदीपिका लक्ष्मीविलास्प्रेस् १९२६

[9] सकलागमसारसङ्ग्रहः, शिवार्चनविधिः

[10] पञ्चाक्षरयोगी शैवभूषणं २००५

[11] एकाम्बरगुरुक्कल् कामिगामः दक्षिणभारतार्चकसभा १९८८ पु ५६

[12] विश्वनाथगुरुक्कल् कारणागमः वेदशिवागमपाठशाला २००३ पु २०७

[13] पञ्चापगेशशिवाचार्यः मकुटागमः

**<u>उपकृतग्रन्थसूची</u>**


1. श्वेताश्वतरोपनिषत्, गीताप्रेस्, गोरखपुर् १९९५
2. कैवल्योपनिषत्, शैवभारती-शोधप्रतिष्ठानम्, वाराणसी २००६
3. ऋग्वेदः, गीताप्रेस्, गोरखपुर्, १९५८
4. योगतन्त्रविभागः रुद्रयामलं संपूर्णानन्दविश्वविद्यालयः १९८०
5. पौष्करागमः, दक्षिणभारतार्चकसभा, १९६२
6. अघोरशिवः क्रियाक्रमद्योतिका २००७
7. Etd by सद्योजातशिवाचार्यः शिवाचर्नदीपिका लक्ष्मीविलास्प्रेस् १९२६
8. सकलागमसारसङ्ग्रहः, शिवार्चनविधिः, श्रीवेङ्कटेश्वरवेदविश्व-विद्यालयः, तिरुपति २०१०
9. सूक्ष्मागमः, तिरुनावुक्करसु चारिटबल् त्रस्ट्, २०२४
10. पञ्चाक्षरयोगी, शैवभूषणम्, २००५
11. Etd by एकाम्बरगुरुक्कल्, कामिगामः दक्षिणभारतार्चकसभा १९८८ पु ५६
12. Etd by विश्वनाथगुरुक्कल्, कारणागमः वेदशिवागमपाठशाला २००३ पु २०७
13. Etd by पञ्चापगेशशिवाचार्यः, मकुटागमः दक्षिणभार-तार्चकसभा १९७७